# Shri Ramakrishna prashastih

# શ્રીરામકૃષ્ણપ્રશસ્તિઃ

## Document Information

Text title : Shri Ramakrishna prashastih

File name : rAmakRRiShNaprashastiH2.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણપ્રશસ્તિઃ

અભૂત્ ત્રેતાયુગે રામઃ કૃષ્ણો યો દ્વાપરે તથા ।
રામકૃષ્ણતયા કાલે કલાવત્ર બભૂવ હ ॥ ૧॥

યુગપ્રવર્તકત્વેન યુગાચાર્યાખ્યયા પુનઃ ।
સ્વામીવિવેકાનન્દોઽતઃ પ્રણમન્નાહ સાદરમ્ ॥ ૨॥

“સ્થાપકાય ચ ધર્મસ્ય સર્વધર્મ સ્વરૂપિણે ।
અવતારવરિષ્ઠાય રામકૃષ્ણાય તે નમઃ” ॥ ૩॥

મતભેદેન માર્ગાણાં ભેદો નાસ્ત્યત્ર સંશયઃ ।
વિભિન્નસાધનાસ્યૂતાનુભૂતિઃ કલ્પના ન હિ ॥ ૪॥

વિશ્વધર્મપ્રતીકોઽભૂદ્ રામકૃષ્ણો ન સંશયઃ ।
સર્વેષામેવ ધર્માણાં સાધના યત્ સમાદૃતાઃ ॥ ૫॥

તદ્રહસ્યમિદં જ્ઞેયં સર્વ એવ હિ માનવાઃ ।
સન્તાનવદ્ધિ વિશ્વસ્ય સ્રષ્ટુર્હિ પરમાત્મનઃ ॥ ૬॥

ઇતિ નિર્ણીય વિશ્વેઽસ્મિન્ ભ્રાતૃત્વે સુપ્રતિષ્ઠિતે ।
વિશ્વબન્ધુત્વસંસિદ્ધિર્મૈત્ર્યૂત્કર્ષાદ્ભવેદિતિ ॥ ૭॥

અત્યન્તબાલ્યકાલે ષડ્વર્ષાવસ્થસ્ય યોગિનઃ ।
ભાવાવસ્થા સ્વતો જાતા રામકૃષ્ણસ્ય ભૂમ્ન્યહો ॥ ૮॥

કસ્ય સાધારણસ્યૈવં દૃષ્ટં કેનાપિ કર્હિચિત્ ।
તતઃપરં સમગ્રે હિ જીવને પરમેશિતુઃ ॥ ૯॥

સગુણત્વાગુણત્વાભ્યાં ધ્યાનનિષ્ઠો બભૂવ સઃ ।
સત્યં ભગવતો રૂપમસત્યં યત્તતઃ પરમ્ ॥ ૧૦॥

ઇતિ નૂતનયા ભઙ્ગ્યા સારયામાસ દુસ્તરે ।
સન્દેહાન્ સ કુતર્કોત્થનાસ્તિકત્વાકુલે યુગે ॥ ૧૧॥

ક એવમન્ય આસ્તે યો લભ્યઃ સાધારણે જને ।
રામકૃષ્ણસમો યઃ સ્યાત્ પ્રથિતોऽસઙ્ખ્યમાનવે ॥ ૧૨॥

ભગવલ્લાભસમ્પર્કે દૃઢ઼ૈચ્છા જાગરં ગતા ।
ઇષ્ટદર્શનકામસ્ય રામકૃષ્ણસ્ય શાશ્વતી ॥ ૧૩॥

તદીયં જન્મ સાધીયો માતુરાશ્વાસિતસ્ય ચ ।
જાતિધર્મ વિશેષાર્થમાગતિસ્તસ્ય નૈવ હિ ॥ ૧૪॥

સમગ્રવિશ્વકલ્યાણપ્રસવાર્થં તદાગમઃ ।
ઇયં વિચિત્રતા તસ્ય સ્પર્શમાત્રેણ કેવલમ્ ॥ ૧૫॥

સમાધિસ્તર ઉન્નીતં બહુ સાધારણં મનઃ ।
સ્વીયાધ્યાત્મિકશક્તેર્હિ કૃત્વા સઙ્ક્રમણં પરે ॥ ૧૬॥

ચૈતન્યોદ્બોધનેનાસૌ તં મુક્તિદ્વારમાનયત્ ।
અહૈતુક્યાં તત્કૃપાયાં સીમા ભૌગોલિકી ન હિ ॥ ૧૭॥

તતસ્તસ્ય કૃપાલાભે સર્વ એવાધિકારિણઃ ।
જન્માપિ નાભવત્તત્ર બાધકં કુત્રચિત્તતઃ ॥ ૧૮॥

અન્ત્યજાદ્યા અપિ કૃપાલાભાત્તસ્ય ન વઞ્ચિતાઃ ।
નાતીત-ભૂપતેર્મુદ્રા વર્તમાનેऽર્થસાધની ॥ ૧૯॥

ઉપાદાનૈક્યસત્વેऽપિ ચિહ્નવૈચિત્ર્ય યોગતઃ ।
સર્વપ્રસિદ્ધમેવૈતત્ તદ્વદેતત્ પ્રબુદ્ધ્તામ્ ॥ ૨૦॥

યુગધર્મશ્ચિહ્નિતોऽદ્ય રામકૃષ્ણચરિત્રતઃ ।
રામકૃષ્ણાવતારસ્ય વૈલક્ષણ્યમિદં મહત્ ॥ ૨૧॥

સન્ત્યજ્ય સકલૈશ્વર્યં દીનવેશે સમાગમઃ ।
ત્યાગસ્તપશ્ચ વૈરાગ્યમીશ્વરાશ્રયતા પરા ॥ ૨૨॥

રામકૃષ્ણાવતારેऽત્ર ભાવૈશ્વર્યમુદાહૃતમ્ ।
ગાર્હ્યસ્થ્યમપિ સંન્યાસો દ્વયં હિ સમપેક્ષિતમ્ ॥ ૨૩॥

ઇત્યપ્યદર્શયદ્રામકૃષ્ણસ્તદ્વયમાશ્રયન્ ।
જીવનાદ્રામકૃષ્ણસ્ય તત્તદાશ્રમજીવને ॥ ૨૪॥

પ્રપતન્નૂતનાલોકસઙ્કેતં પ્રાપ નિશ્ચિતમ્ ।
સત્યયોર્દેવદેવ્યોસ્તુ મૂર્તિપૂજાપિ નાનૃતા ॥ ૨૫॥

દ્વૈતં વિશિષ્ટાદ્વૈતં ચાદ્વૈતં સર્વં હિ શોભનમ્ ।
શૈવાઃ શાક્તા ગાણપત્યા બૌદ્ધાઃ ખૃષ્ટાનુયાયિનઃ ॥ ૨૬॥

યવનાશ્ચ સમે ધર્માઃ શાખાભૂતાઃ સ્તરાત્મકાઃ ।
કિંવા વેદાન્તધર્મસ્ય વિતતામિતશાખિનઃ ॥ ૨૭॥

તાસાં તાસાં સાધનાનાં વિધાનેનોપદેશતઃ ।
ઇત્યેવ ખ્યાપયામાસ રામકૃષ્ણઃ પ્રભુઃ પરઃ ॥ ૨૮॥

પત્નીં દેવીસ્વરૂપેણ સમ્પૂજ્યાદાદ્ બૃહત્તરામ્ ।
મર્યાદાં માતૃજાત્યૈ હિ તદ્દેવત્વં સ્થિરીકૃતમ્ ॥ ૨૯॥

ગચ્છામિ શરણં શ્રીમદ્રામકૃષ્ણપદામ્બુજમ્ ।
તસ્માત્ સદૈવ હૃદયે સમુદેતુ સ એવ હિ ॥ ૩૦॥

ઇતિ ન્યાયાચાર્ય પણ્ડિત આનન્દ ઝા ઇત્યેતેન વિરચિતા
"શ્રીરામકૃષ્ણ-પ્રશસ્તિઃ" સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Ramakrishna prashastih*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*